Total printed pages:- 8

Name 17/01/2020

Roll no. ..................

# DELHI PUBLIC SCHOOL, VINDHYANAGAR

## PRE-BOARD EXAM (2019-20)

**CLASS – X** **M. M. - 80**

**SUBJECT _ संस्कृत** Time: 3 hrs

खण्ड – (क)

अपठित – अवबोधनम् (10 अंकाः)

प्र01. अधोलिखित गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत– 10

समाचारपत्रम् वर्तमानयुगस्य दर्पणम् वर्तते। जनजागरणस्य सर्वश्रेष्ठं सर्वप्रियम् सुलभं साधनं वर्तते। साधारणजनतायाः शिक्षकः वर्तते समाचारपत्रम् लोकतान्त्रिकराष्टेषु जनशक्तेः चतुर्थः स्तम्भः स्वीकियते। अधुना समाचारपत्रम् प्रातः कालीनः अल्पाहारः वर्तते। प्रातः काले समाचारपत्रम् न प्राप्य जनाः व्याकुलाः जायन्ते। समाचारपत्रैः एव वसुधैव कुटुम्बकस्य उद्घोषस्य कार्यान्वयनम् कृतम् । संपूर्णविश्वस्य समाचाराः समाचारपत्रैः समान्यजनताम् प्रति प्राप्यन्ते । समाचारपत्रम् राष्ट्रनेतृणाम् कटु आलोचनाम् कृत्वा शासनस्य प्रहरी वर्तते समाचारपत्राणां लेखेषु सम्पादकीय – स्तम्भेषु जनतायाः विचारधाराम् दृष्टिकोणं च परावर्तयितुम् महती शक्तिः वर्तते । सामाजिककुरीतिनाम् राजनीतिकछलप्रपंचानाम् धार्मिकोन्मादस्य वर्णनं कृत्वा समाचारपत्रम् समाजसुधारकः जायते। वर्तमानयुगे समाचारपत्रैः लक्षशः जनाः आजीविकां प्राप्नुवन्ति धनोपार्जनं च कुर्वन्ति।

(अ) एकपदेन उत्तरत् ( केवलं प्रश्नद्वयम् ) 1x2=2

(1) समाचारपत्रम् कुत्र चतुर्थः स्तम्भः ?

(2) समाचाराः कैः जनताम् प्रति आगच्छन्ति?

(3) जनाः आजीविकां प्राप्य किं कुर्वन्ति?

(ब) पूर्णवाक्येन उत्तरत – ( केवलं प्रश्नद्वयम् ) 2x2=4

(1) समाचारपत्रेषु किम् कर्तुम् महती शक्ति वर्तते ?

(2) समाचारपत्रम् समाजसुधारकः कथम् जायते ?

(स) यथानिर्देशं उत्तरत – ( केवलं प्रश्नत्रयम् ) 1x3=3

(1) रक्षकः अस्मिन् अर्थे अनुच्छेदे किम् पदम् प्रयुक्तम् ?

(अ) दर्पणम् (ब) प्रहरी (स) शिक्षकः

(2) चतुर्थः स्तम्भः अनयोः पदयोः विशेष्यपदं किम् ?

(अ) स्तम्भः (ब) चतुर्थस्तम्भः (स) चतुर्थः

(3) दुर्लभं अस्य विपर्ययं अनुच्छेदात् चित्वा लिखत ।

(अ) सर्वश्रेष्ठं (ब) सर्वप्रियम् (स) सुलभं

(4) " समाचारपत्रैः लक्षशः जनाः आजीविकां प्राप्नुवन्ति " अस्मिन् वाक्ये कर्तृ पदम् किम् ?

(अ) लक्षशः (ब) समाचारपत्रैः (स) जनाः

(द) अस्य गद्यांशस्य उचितं शीर्षकं लिखत । 1

## खण्ड : ख

**रचनात्मककार्यम्** - ( **15** अङ्काः )

प्र02. भवतः नाम राघवः । भवतः मित्रं गौरवः नवोदयविद्यालयस्य छात्रावासे वसति। सः अस्वस्थोऽस्ति। स्वास्थ्यरक्षणाय तं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा तत् पत्रं पुनः लिखत- **1/2x10=5**

गृहसंख्या 1/2 एस० एन० विन्ध्यांचल

तिथिः -------------

प्रिय मित्र गौरव !

(i) ----------

भवतः पत्रात् मया (ii) ---------- यत् त्वम् गतसप्ताहात् अस्वस्थः असि । अहं (iii) ....... ....... सह तव विषये चर्चा कृतवान् । मम जनकः एकः (iv) ....... ....... अस्ति। तेन स्वास्थ्यरक्षणाय ये (v) ....... ....... दत्ताः तान् अहं लिखामि । ते नियमाः एवं सन्ति । प्रातः सूर्योदयात् (vi) ....... .......... शय्यात्यागः करणीयः । रात्रौ च दशवादने शयितव्यम् । प्रतिदिनं भ्रमणं व्यायामः च कर्तव्यौ। यावत् (vii) ....... ....... अनुभूतिः न भवेत्, भोजनं न कर्तव्यम् । भोजनेन सह जलं न पातव्यम् । भोजनं शनैः शनैः चर्वणपूर्वकम् (viii) ............. भक्षणीयम् । प्रतिदिनं पर्याप्तं जलं पातव्यम् । अन्यत् सर्वं कुशलम् । समय-समये स्वास्थ्यविषये त्वया अवश्यं सूचनीयम्।

त्वदीयं प्रियं सुहृद्,

(ix) ....... .......

वेष्टनम्-

श्रीगौरवः

कक्षसंख्या - पञ्चदश

छात्रावासः - नवोदयविद्यालयः

(x) ....... ....... म०प्र०

**मञ्जूषा**

क्षुधायाः, निर्देशाः, सिंगरौली, स्वपित्रा, ज्ञातम्, राघवः, प्राकृतिकचिकित्सकः, एकहोरापूर्वम् , प्रसन्नमनसा , सप्रेम नमस्ते

प्र0 3 अधोलिखितवाक्यानां संस्कृतभाषायां अनुवादं कुरुत – ( केवलं पंचवाक्यानाम् ) 1 x 5 = 5

(i) संस्कृत एक वैज्ञानिक भाषा है ।

(ii) अनुशासन ही जीवन का आधार है ।

(iii) तुम भी विन्ध्यनगर में पढ़ो ।

(iv) सभी की सुरक्षा अनिवार्य है ।

(v) हमारे देश का नाम आर्यावर्त था ।

(vi) कल विद्यालय का अवकाश रहेगा ।

प्र0 4 मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि लिखत। 1 x 5 = 5

मंजूषा -- वस्त्राणि ,नद्यांम् , जनाः , वृक्षाः , रजकः , बालौ , शिलापट्टे , स्नातः , अस्माकम , गौरवाः , पर्वताः , सुन्दरम् , अनुभवन्ति , क्षालयति



## खण्डः 'ग'

## अनुपयुक्तव्याकरणम् ( 25 अङ्काः )

प्र0 5 अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कुरुत- ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) **ग्रामच्छटा** द्रष्टुमपि न शक्यते ।

(ii) शब्दरूपाः **सुप् + अन्ताः** भवन्ति ।

(iii) **विष्णोराज्ञया** अहं पुस्तकं लिखामि ।

(iv) **वाङ्मयम्** तपः करणीयम् ।

(v) **निः + उपायाः** सेवकाः तूष्णीम् अतिष्ठन् ।

प्र06 अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।( केवलं प्रश्नचतुष्टयम् ) 1x 4 = 4

(i) मानवाय जीवनं कामये नो **जीवन्मरणम्** ।
(अ) जीवनम् मरणम् (ब) जीवनम् च मरणम् च (स) जीवनम् च मरणम् च तयोः समाहारः

(ii) **निशान्धकारे** प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा ।
(अ) निशाम् अन्धकारे (ब) निशायाम् अन्धकारे (स) निशायाः अन्धकारे

(iii) **धर्मज्ञः** आचार्यः आगच्छति ।
(अ) धर्मं जानाति यः सः (ब) धर्मं जायते यः सः (स) धर्मान् जानाति यया

(iv) **अर्थस्य अभावः इति** कार्यं नैव उचितम् ।
(अ) निरर्थः (ब) निरर्थम् (स) निरर्थाः

(v) **बकहंसयोः** रूपम् एकमेव भवति ।
(अ) बकः च हंसयोः (ब) बकः च हंसः च (स) बकस्य च हंसस्य च

प्र07 अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं लिखत।

( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) सिद्धार्थः **दया + मतुम्** आसीत् ।
(अ) दयालुः (ब) दयावान् (स) दयावन्तः

(ii) शरीरं **भौतिकम्** एव वर्तते ।
(अ) भूत + ठक् (ब) भूत + इक् (स) भौतिक + ठक्

(iii) **शीलतां** दृष्ट्वा जनाः प्रसीदन्ति ।
(अ) शीला + टाप् (ब) शील + ता (स) शील + तल्

(iv) पुरा गार्गी नाम एका **विद्वस् + ङीप्** आसीत् ।
(अ) विद्यावती (ब) विदुषी (स) विद्वसी

(v) यत्रास्ते सा **धूर्ता** तत्र गम्यताम् ।
(अ) धूर्त + टाप् (ब) धूर्त + तल् (स) धूर् + ता

प्र0 8 वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत। 1 x 3 = 3

(i) त्वया पिता ...................... ।
(अ) स्मर्यते (ब) स्मरसि (स) स्मर्यै

(ii) विद्वान् सर्वैः ...................... ।
(अ) पूज्यन्ते (ब) पूज्यते (स) पूजयन्ति

(iii) श्रमिकाः क्षेत्रे श्रमं ...................... ।
(अ) क्रियते (ब) क्रियन्ते (स) कुर्वन्ति

<u>अथवा</u>

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत – ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) छात्राः गुरुं नमन्ति ।

(ii) किं त्वं फलानि खादसि ?

(iii) छायाकारः चित्राणि रचयति ।

(iv) त्वया उपयुक्तः लेखः लिख्यते ।

प्र0 9 अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संस्कृतसंख्यापदानि लिखत। ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) गणेशः प्रातः <u>5:30</u> वादने उत्तिष्ठति।

(ii) <u>7:15</u> वादने सा विद्यालयम् गच्छति।

(iii) गृहमागत्य <u>11:45</u> वादने भोजनं करोति।

(iv) सायं <u>4:00</u> वादने दूरदर्शनम् पश्यति।

(v) रात्रौ <u>10.30</u> वादने शयनं करोति।

प्र0 10 मञ्जूषायाः उचितम् अव्ययपदानि चित्वा वाक्येषु रिक्तस्थानानि पूरयत। ( केवलं प्रश्नषट्कम् ) **1/2 x 6 = 3**

मञ्जूषा – **सम्प्रति , सह , वृथा , ह्यः , इदानीम् , सहसा , श्वः**

(i) एका कन्या ................ सखिभिः सह वार्तां करोति ।

(ii) प्रातः कालः संजात ........................ निद्रा न युज्यते ।

(iii) ...................... दिल्लीनगरं गत्वा गणतन्त्रोत्सवं द्रक्ष्यामि ।

(iv) मित्रैः ......................... भ्रमणं आनन्ददायकं भवति ।

(v) निर्जन स्थाने रोदनं ..................... भवति ।

(vi) ................. मम जन्मदिवसः आसीत् ।

(vii) ................. किमपि कार्यं न करणीयम् ।

प्र0 11 रेखाङ्कितपदानां संशोधनं कृत्वा लिखत – ( केवलं प्रश्नत्रयम् ) **1 x 3 = 3**

| | |
|---|---|
| (i) विवेकः मम **मित्रः** अस्ति । | ( मित्र / मित्रम् / मित्रे ) |
| (ii) पयः **मधुरः** भवति । | ( मधुरा / मधुर! / मधुरम् ) |
| (iii) उद्याने **त्रीणि** बालकाः क्रीडन्ति । | ( त्रयः / तिस्रः / तृतीयः ) |
| (iv) अहं नित्य प्रातःकाले **भ्रमाम** । | ( भ्रमतु / भ्रम / भ्रमानि ) |

## खण्ड : 'घ'

## पठित–अवबोधनम् – 30 अङ्काः

प्र012 अधोलिखित गद्याशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

(वनस्य दृश्यम् । समीपे एवैका नदी अपि वहति ।)

एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनोति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूदित्वा वृक्षमारूढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति एवमेव वानराः वारं वारं सिंहं तुदन्ति । क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति।वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति। निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति-

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1/2x2=1

(i) कस्य समीपे एका नदी वहति ?

(ii) वानरः कस्य पुच्छं धुनोति ?

(iii) पक्षिणः कीदृशं कलरवं कुर्वन्ति ?

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) क्रुद्धः सिंहः किं करोति ?

(ii) वानराः वारं वारं कथं सिंहं तुदन्ति ?

**III.** निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नत्रयम्) 1 x 3 = 3

(i) ' पृच्छति ' इति क्रियापदस्य कर्तृपदं किम्? -

(क) जन्तून् (ख) जीवैः (ग) आत्मनः (घ) वनराजः ।

(ii) क्रुद्धः सिंहः तं प्रहर्तुमिच्छति ।' अस्मिन् वाक्ये 'तम्' सर्वनामपदं कस्मै प्रयुक्तम्? ।

(क) वनराजाय (ख) वानराय (ग) वृक्षाय (घ) सिंहाय

(iii) 'वृक्षात्' इति पदस्य विशेषणपदं किम्?

(क) अन्यस्मात् (ख) अपरः । (ग) एका (घ) विविधाः

(iv) 'खगाः' इत्यर्थ किं पदं प्रयुक्तम्?

(क) क्रुद्धः (ख) पक्षिणः (ग) सिंहः (घ) एवैका

प्र013. अधोलिखित नाट्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत --

रामः - (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति। (सवाष्पमवलोकयति)

अतिदीर्घः प्रवासोऽयं दारुणश्च । (विदूषकमवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि । न युक्तं च स्त्रीगतमनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः ?

विदूषकः - (जनान्तिकम्) अहं पुनः पृच्छामि। (प्रकाशम्) किं नामधेया युवयोर्जननी ?

लवः - तस्याः द्वे नामनी।

विदूषकः - कथमिव ?

लवः - तपोवनवासिनो देवीति नाम्नाह्वयन्ति , भगवान् वाल्मीकिर्वधूरिति।

रामः- अपि च इतस्तावद् वयस्य! मुहूर्तमात्रम्।

विदूषकः - (उपसृत्य) आज्ञापयतु भवान्।

रामः - अपि कुमारयोरनयोरस्माकं च सर्वथा समरूपः कुटुम्बवृत्तान्तः ?

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1/2x2=1

(i) का:अतिदीर्घः दारुणश्च ?

(ii) कयोः मातरं वाल्मीकिर्वधूरिति नाम्नाह्वयति ?

(iii) का स्वापत्यं मन्युगर्भैरक्षरैर्निर्भर्त्सयति।

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) रामः किं वेदितुमिच्छाति ?

(ii) समरूपः कः अस्ति

**III.** निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नत्रयम्) 1 x 3 = 3

(i) अपि च इतस्तावद् वयस्य अत्र किं पदं अव्ययं नास्ति ?

(क) अपि (ख) च (ग) इतस्तावत् (घ) वयस्य

(ii) सा इति पदस्य विशेष्यपदं किम् ?

(क) नामनी (ख) स्त्री (ग) तपस्विनी (घ) जननी

(iii) <u>तपोवनवासिनः</u> इति कर्तृपदस्य क्रियापदं किम् ?

(क) देवीति (ख) आह्वयन्ति (ग) आह्वयति (घ) वधूरिति

(iv) <u>स्वगतम्</u> इति पदस्य विपर्ययपदं किम् ?

(क) प्रकाशम् (ख) उपसृत्य (ग) भगवान् (घ) समरूपः

प्र014. अधोलिखित पद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः ।।

I. एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1/2x2=1

(i) परुषां वाचं कः वदति ?

(ii) विमूढधीः कीदृशीं वाचं त्यजति ?

(iii) पक्वं किमस्ति ?

II पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) विमूढधीः कीदृशीं वाचं त्यक्त्वा किं वदति ?

(ii) विमूढधीः की दृशं फलं त्यक्त्वा किं खादति ?

III. निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नत्रयम्) 1 x 3 = 3

**(i) <u>भुङ्क्ते</u>** इति कियायाः कर्तृपदं किम् ?

(अ) वाचम् (ब) फलम् (स) धर्मम्

**(ii) <u>त्यक्त्वा</u>** इति पदस्य विलोमपदं किम् ?

(अ) परित्यज्य (ब) अपक्वं (स) उदीरयेत

**(iii) <u>विमूढधीः</u>** पदे का विभक्तिः ?

(अ) तृतीय (ब) सप्तमी (स) प्रथमा

**(iv) <u>वाचं</u>** इति पदस्य किं विशेषण पदं नास्ति ?

(अ) धर्मप्रदाम् (ब) अपक्वम् (स) परुषाम्

प्र015 प्रश्ननिर्माणं कुरुत – ( केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4

(i) <u>ललितलतानां</u> माला रमणीया।

(ii) <u>व्याघ्रभक्षणाय</u> कलहं कुरुथः?

(iii) <u>तपोवनवासिनः</u> सीतां देवीति नाम्नाह्वयन्ति।

(iv) <u>दुर्बले</u> सुते मातुः अभ्यधिका कृपा सहजैव भवति ।

(v) <u>आरक्षी</u> सुपुष्टदेह आसीत् ।

प्र016 अधोलिखितश्लोकयोः अन्वयम् उचितपदैः पूरयत। ½ x 4 = 2 +½ x 4 = 2

मञ्जूषा - (कठिनं , कज्जलमलिनं , महत् , इति , अनन्ताः , तत् , अस्य, ध्वानम् )

(i) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपः तेपे इत्युक्तिः तत्कृतज्ञता ।।

अन्वयः - पिता पुत्राय बाल्ये <u>(i)</u> विद्याधनं यच्छति <u>(ii)</u> पिता किं तपः तेपे <u>(iii)</u> उक्तिः <u>(iv)</u> कृतज्ञता ।

(ii) कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।।
वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्।

अन्वयः- शतशकटीयानम् ___(i)___ धूमं मुञ्चति, वाष्पयानमाला ___(ii)___ वितरन्ती संधावति । यानानां ___(iii)___ पङ्क्तयः हि ___(iv)___ संसरणम्।

**अथवा**

मंजूषायाः साहायतया श्लोकं पठित्वा भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत    1 x 4 = 4

**मंजूषा – उपसर्पन्ति , वैनतेयस्य , सुदर्शनम् व्याधयः**

व्याधयो नोपसर्पन्ति वैनतेय मिवोरगाः ।
वयोरूपगुणैर्हीनमपि कुर्यात्सुदर्शनम् ।।

यथा .................. समीपे उरगाः न ..................... एवमेव व्यायामिनः जनस्य समीपे ................... न गच्छन्ति । व्यायामः वयोरूपगुणहीनम् अपि जनं ............................ करोति ।

प्र017 अधोलिखित – कथांशं समुचित क्रमेण लिखत –    ½ x 8 = 4

(i) एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य पुत्रं द्रष्टुं प्रस्थितः।
(ii) पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च ।
(iii) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः ।
(iv) कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।
(v) पार्श्वस्थिते ग्रामे रात्रिनिवास कर्तुं कञ्चिद् गृहस्थमुपागतः।
(vi) न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्।
(vii) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।
(viii) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।

प्र018 उचितम् अर्थम् चित्वा लिखत। ( केवलं प्रश्नत्रयम्)    ½ x 6 = 3

| | | |
|---|---|---|
| ( i ) खरः | – | सूर्यः |
| (ii) अकातरः | – | काकः |
| (iii) हयाः | – | हस्तिनः |
| (iv) सविता | – | गर्दभः |
| (v) नागाः | – | अश्वाः |
| (vi) वायसः | – | वीरः |

0000000000000000000